शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

अलङ्कार विवेचनम्

साहित्य दर्पण: दशम: परिच्छेद:

एकावली नामकस्यालङ्कार विवेचनम् ।

'पूर्वं पूर्वं प्रतिकारणत्वेन परं परम्'
स्थाप्यतेऽपोह्यते वा चेत्स्यात्तदैकावली द्विधा ॥'

यदि पूर्वं पूर्वं विशेष्यम्प्रति उत्तरमुत्तरं विशेषणत्वेन, विशेष्यं स्थाप्यते = विधीयते, अपोह्यते - विधीयते निषिध्यते वा तदा स्थापनापोहनात्मकतया द्वि प्रकारा, एक एव विशेषणत्वेन अपर: विशेष्यत्वेन वा विहितानाम अपोहितानाँ आवली = श्रेणी, एकावली-तन्नामकालङ्कार: ।

अपोहने उदाहरणं यथा-

'न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद् यदलीन षट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज य: कलं
न गुञ्जितं तन्न जहार यन्मन: ॥'

अत्र जलादिकं पूर्वं पूर्वं विशेष्यं प्रति पङ्कजात् उत्तरोत्तर विशेषणस्य विशेषणत्वेन निषेधनात् एकावली नामकालङ्कार: । एवं विशेष्यत्वेन स्थापनापि उदाहरणानि बोध्यानीति ।

उमेश झा
२१/९/२०
प्राध्या० साहित्य
रा० ज० सं० महावि०
कुरसों, दरभंगा

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)

## वेणी संहार नाटकम्

वेणीसंहारनाटकस्य रचयितुः स्थितिकालं जीवनवृत्तान्तं च वर्णयत ।

संस्कृत कविषु प्राचीन कालादेव आत्मजीवन वृत्त लेखन-परिपाटी नासीत । एवं तस्य रचनायाः अन्तः-बहिः साक्ष्येण च कवेः विचारः करणीयः । वेणीसंहारस्य रचयिता महाकविः भट्टनारायणः स्वस्य एकमात्र रचना वेणीसंहार नाटके – 'तदिदं कवेर्मृगराजलक्ष्मणो भट्टनारायणस्य कृतिं वेणीसंहारनाटकम्' इति लिखित्वा मौनमधारयत । प्रसिद्ध इतिहासकारः डा० गजेन्द्रगडकरमतानुसारेणायं हि महाकविः बौद्धमतेन प्रभावितो भूत्वा वैदिक सनातनधर्म अनुयायिभिः पण्डितैः उत्पीडितः सन् कान्यकुब्जदेशं विहाय वंगदेशे सेनवंश प्रवर्तकः आदि शूरस्य सनातन पण्डितेषु प्रधान पण्डितः आसीत् । एवं क्रमेण वंगदेशे स्थायी निवासं कृतवान् ।

वेणी संहारस्य प्रस्तावनायां 'कवेर्मृगराज लक्ष्मणः' इति लेखेन जनाः भट्टनारायणः क्षत्रिय आसीत् इति कथयन्ति । परं कवेः मृगराजस्य = कविसिंहस्य लक्ष्म = चिह्नं यस्य तथाविधस्य इति व्याख्यायां धारणेयं निर्मूला सञ्जायते । कविः ब्राह्मणस्य मर्यादारक्षणं सर्वत्रैव नाटके चकार । न कोऽपि अन्य नाटककार एवं ब्राह्मणपात्रस्य मूर्खतां-दुर्दशां वा प्रदर्शनं कृतवान् तेनायं ब्राह्मणः आसीत् ।

वेणीसंहारस्य श्लोकानां सर्वप्रथमः अष्टशताब्द्याः उत्तरार्द्धे सञ्जातः आचार्यः वामनः स्वस्य 'अलंकार सूत्रवृत्तिः' नामके ग्रन्थे उदाहरण रूपेण कृतवान् । काव्यप्रकाशे, सरस्वतीकण्ठाभरणे एवञ्च ध्वन्यालोकेऽपि अस्य वेणीसंहार नाटकस्य बहून् श्लोकान् उद्धृतवन्तः कवयः । परं 'सप्तम शताब्द्यां' जातः प्रकविः बाणभट्टः तस्य नामोल्लेखमपि न चकार । अनेन भट्टनारायणस्य कालः सप्तमशताब्द्याः उत्तरार्द्धे अष्टम शताब्द्याश्च पूर्वार्द्धे एवं निश्चियते ।

अस्य मातृ-पितृ विषये नैव किमपि ज्ञायते । परन्तु निःसन्देहमयं योग-सांख्य-वेदान्तदर्शन-छन्द शास्त्र-अलङ्कारशास्त्र विषयेषु निष्णातः प्रसिद्धः याज्ञिक पण्डितः आसीत् । वेणीसंहार नाटकम् एतस्य एकमात्रं उपलब्धा रचनाऽस्ति । इति

उपेन्द्र झा
29/9/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
पुरकलेत्ता, [illegible]

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

अभिज्ञानशाकुन्तलम् नाम नाटकस्य श्लोक व्याख्या

प्रसङ्गव्याख्यान –

'मुक्तेषु रश्मिषु निरायतपूर्वकायाः
पूर्वाणामपि प्रसरतां रजसामलङ्घ्याः।
निष्कम्पचामरशिखाश्च्युतकर्णभङ्गा
धावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते ॥'

प्रस्तुतोऽयं श्लोकः संस्कृत साहित्याकाशे सर्वविदित देदीप्यमान नक्षत्रः प्रभूततराणां प्रमाणानां सत्त्वात् ईसापूर्व प्रथम शताब्द्यां समुत्पन्नः महाकवि कालिदासेन विरचितः अभिज्ञानशाकुन्तलम् नामधेयं नाटकस्य प्रथम सर्गादुद्धृतोऽस्ति। श्लोकेऽस्मिन् यदा सूत्रधारो नटी परिसदः श्रुतिप्रमोदहेतुं काञ्चित् गीतिं गातुं कथयति, नटी ग्रीष्मर्तुवर्णनं कर्तुं सूत्रधारं कथयति, तदा सूत्रधारो ग्रीष्मर्तुमधिकृत्य महाकविना एव दुष्यन्तकथावर्णनं प्रतिपादयति। इति प्रसङ्गे मृगं दृष्ट्वा राजा दुष्यन्तस्य रथस्य धावनं वर्णयति। अत्र राजा दुष्यन्तो रथेनानुसरन् मृगं पश्यति सूतं च कथयति तदा सूतो रथस्य अश्वानां गतिं च प्रतिपादयति। उद्घाटिती भूमीरिति रथस्य गमनकारणं प्रतिपादयति। सम्प्रति मृगदेशवर्तिनस्ते न दुरासदो भविष्यतीति अश्वानां गतिं च प्रतिपादनं कथयति।

मुक्तेषु रश्मिषु निरायतपूर्वकायाः स्वेषाम् अपि प्रसरतां रजसाम् अलङ्घ्याः निष्कम्पचामरशिखाः च्युतकर्णभङ्गाः ते वाजिनः वर्त्मनि धावन्ति नु तरन्ति।

मुक्तेषु = त्यक्तेषु शिथिलीकृतेषु रश्मिषु = रज्जुषु, प्रग्रहेषु निः = नितराम् समन्ततः आयतम् = दीर्घं कायाः शरीरस्य पूर्वं = पूर्वभागो येषां ते स्वेषाम् = आत्मनां खुराग्रोद्धूतानामपि प्रसरतां = वायुवेगेन गच्छतां रजसां = धूलीनाम् अलङ्घ्याः = अतिक्रमितुमयोग्याः निष्कम्पाः = निश्चलाः चामरशिखावतां मूर्धानां शिखाः = अग्रभागाः येषां ते च्युताः पतिताः कर्णयोः शोभायाः भङ्गाः = धनं येषां ते एवंभूतास्ते वाजिनः = अश्वाः वर्त्मनि = मार्गे धावन्ति = द्रुतगत्या गच्छन्ति नु अथवा (आकाशे) तरन्ति = तीर्त्वा गच्छन्तीति।

अत्र पादत्रये वाजिनां स्वभाववर्णनात् स्वभावोक्तिरलङ्कारः। – 'स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम्' इति लक्षणात्। अन्तिम पादे उत्प्रेक्षा धावने तरणस्य सम्भावनात् – 'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना' इति लक्षणात्। वसन्ततिलका छन्दः – 'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात्।

उपेन्द्र झा
२१/९/२०
सहा० प्रा० साहित्य
रा० उ० सं० महावि०
फुलवेरा, इंगिरिया